## ।। अथ षड्विंशोऽध्याय: ।। Chapter-26

वसिष्ठ उवाच :- ततो गच्छेन्महाराज भूर्भुवस्वेति विश्रुतम्[1]।
कलिकालभयाद्यत्र निवसन्त्यखिला: सुरा: ।। १

पुरा लोकास्त्रयो राजन् मूर्तिमन्त: पितामहम् ।
उपासितुंगतास्तत्र निषण्दुर्ब्रह्मसंसदि ।। २

भूर्लोकोथ भुवर्लोक: स्वर्लोकश्च[2] विशांपते ।। ३

मुनीनामुपरोधेन[3] पृष्ट: प्रोवाच पद्मभू: ।।
कलेर्युगस्य माहात्म्यं रौद्रं मुनिभयावहम् ।। ४

ब्रह्मोवाच :- द्वापरान्ते कलिर्घोरो भविष्यति युगाधम : ।।
तस्मिन् देवानुपासन्ते[4] न मनुष्या: कथंचन ।। ५

न वर्णान् ब्राह्मणश्रेष्ठान्नार्यो धर्मत: पतीन् ।।
न पुत्र: पितरं नैव भ्रातरं मातरं तथा ।। ६

-----

1 बी ई भूर्भुव: स्वइतिश्रुतम- इतेव साधु स्यात्
4 पौराणिक एष प्रयोगो न्यथा उपासते
2 ए- स्वर्लोक 3 ए - मूनीनां

श्वश्रूश्वशुरवाक्येन त्यक्ष्यन्ति पितरो नरा ।।
अग्निहोत्राणि सीदन्ति प्राप्ते तस्मिन् कलौ युगे ।। ७

अर्थलोभेन भर्त्तारं घातयन्ति च योषित : ।।
स्वामिभिर्राज्यलोभेन भृत्यामात्यादयस्तथा ।। ८

यो यो मनोगत: स्त्रीणां युवा भवति क्लिवान् ।।
ते तं संगत्य रहसि सेविष्यन्ते मुदान्विता: ।। ६

भूमिरल्पफला नित्यं दुग्धहीनाश्च धैनव: ।।
भविष्यन्ति कलौ प्राप्ते वेदविक्रयिणो नरा: ।। १०

कुमारत्वेऽपि नारीणां रजोदर्शनमेष्यति ।।
सप्तमे वाष्टमे वर्षे गर्भ: स्त्रीषु भविष्यति ।। ११

अनुरागं करिष्यन्ति पिशुनेषु महीभुज: ।।
साधूनर्थस्य लोभेन दंडयिष्यन्ति चोधता: ।। १२

---

बी १ भूमिरल्पफला नूनं दुग्धहीनाश्च (ए १) न्ति
2 ई सी बी क - चोधता

बलिभिर्दुर्बला गाढं बाध्यन्ते दारूणे कलौ ।।
पादमेकं हि धर्मस्य सत्यं यास्यति संक्षयम् ।। १३

अग्निष्टोमादिका: सर्वा: क्रियायास्यन्ति सत्तमा: ।।
एतद्व: कथितं सर्वं माहात्म्यं दारूणं कले: ।। १४

कुरूक्षेत्रे प्रभासे च श्रीमाले श्रीस्थलेऽर्बुदे ।।
वाराणस्यां गयायां च द्वारिकायां च पुष्करे ।। १५

गंगायमुनयोर्मध्ये श्रीशैले च हिमाचले ।।
तटे रेवासरस्वत्योर्गोदावर्याश्रमे द्विजा: ।। १६

एषु षोडशतीर्थेषु प्रवेशो न कले: क्वचित् ।।
तत्र तत्र च गन्तव्यं तस्मात्तीर्थे तथा सुरै: ।। १७

वसिष्ठ उवाच:- इत्याकर्ण्य मुनिश्रेष्ठा ब्रह्मणो वाक्यमुत्तमम् ।।
स्वं स्वं स्थानं ययु: सर्वे कलिशंकितचेतस: ।। १८

---

१- सक्रिया इत्येव साधुस्यात् ।
२-बी ई श्रीमाले
३-बी ई- बै द्विजा:

अथ लोकास्त्रयो राजन् श्रीमालं चाश्रमाययु: ।।
वृद्ध-ब्राह्मणरूपेण देवदेवमतोषयन्[२] ।। १९

तेषां तपोभिरत्युग्रै: स्नानदानैश्च पुष्कलै: ।।
जपैर्होमैश्च नैवेद्यै: प्रत्यक्षोऽभून्महेश्वर ।। २०

उदतिष्ठन्महालिंगं तेषामग्रे तपस्यताम् ।।
अथ तान् प्रणतान् देवो मधुराक्षरमब्रवीत् ।। २१

देवदेव उवाच :- वरं वृणुत हे लोका यदर्थं तप्यते तप: ।।
दास्यामि नात्र सन्देहो यद्यपि स्यात्सुदुर्लभम् ।। २२

लोका ऊचु : :- अत्र त्वया निवस्तव्यं लिंगे शंकर सर्वदा ।।
अस्माकं प्रीतये देव भक्तानामभयाय च ।। २३

कलिकाले निवत्स्यन्ति ये नरास्तव सन्निधौ ।।
अस्पृश्या: कलिकालेन सन्तु ते त्वदनुग्रहात् ।। २४

------

१ बी ई मतूतुषन् ।

दैवदेव उवाच :- सदाहमत्र वत्स्यामि युष्मांक प्रीतये[१] खलु ।।
अभयं च प्रदास्यामि कलिकालाद्भयेषुणाम् ।। २५

त्रिभिराराधितं लोकैर्लिंगमेतदभूद् भुवि ।।
तेन वै भूर्भुव: स्वेति नाम्ना ख्यातं भविष्यति ।। २६

वसिष्ठ उवाच :- इत्युक्त्वा वचनं राजन् विष्टपानां त्रिलोचन: ।।
बभूवादर्शनं दैव:स समीपा त्प्रदीपवत् ।। २७

तत: प्रभृति तल्लिंगं भूर्भुव: स्वैति विश्रुतम् ।।
कृतिनो ये नमस्यन्ति न तेषां नरकाद्भयम् ।। २८

शुक्लमार्गचतुर्दश्यां भक्त्या विल्वदलैरपि ।।
भूर्भुव:स्वार्चनं कुर्वन्नारी गर्भे न जायते ।। २९

तत्र रोहितका वृक्षा दृश्यन्ते ऽद्यापि सर्वत: ।।
फलैरास्वादितै र्येषां छाया नश्यति तत्क्षणात् ।। ३०

-----

१ ए प्रतिये

माहात्म्यं भूर्भुवःस्वस्य य इदं शृणुयान्नर : ।।
मासमैकं कलिस्तस्य न पार्श्वमुपसर्प्पति ।। ३१

----

इति श्री स्कंदपुराणे एकाशीति साहस्त्रयां संहितायां ब्राह्म्य -
विभागे तृतीय परिच्छेदे श्रीमालमाहात्म्ये भूर्भुवः स्वेश्वर -
माहात्म्यं नाम षडविंशोऽध्याय: २६ ।।